अपि वेधोमुखा देवा यस्य वीक्षावशंवदाः ॥ १ ॥

अपि च —

इक्षुर्यस्य शरासनं सुमनसो मर्मच्छिदस्सायकाः
जैत्रः कोऽपि समीरणो मृदुगतिः वासन्तिकस्स्यन्दनः ।
निर्ग्राह्यं जगदेव शङ्करहरिब्रह्मादिकीटावधि
श्रेयः चित्रपरिच्छदो रतिपतिर्दद्यात्स वीराग्रणीः ॥ २ ॥

अपि च —

मन्दाः केचन चन्दनाचलकुटीविश्रान्तदेवाङ्गना-
रत्यन्तश्लथकेशवान्तकुसुमामोदस्पृशो मारुताः ।
किञ्च प्रान्तवलन्मधुव्रतरुतैराप्यायन्तः श्रुतीः
प्रेयांसः प्रसवाशुगस्य ददतु श्रेयांसि भूयांसि वः ॥ ३ ॥

[नान्द्यन्ते सूत्रधारः अञ्जलिं वद्ध्वा]

अद्य खलु समादिष्टोऽस्मि, सकलसामन्तराजचक्रमौलिमाणिक्यकिरणपुञ्जकिञ्जल्कित-चरणारविन्दस्य निश्चलविजयेन्दिराकटाक्षविलासगतागतसमपात्रभावस्य विद्वच्चकोरकुलराकासुधा-करस्य प्रतिशरदनेहसं प्रवर्तमाननिजजैत्रयात्राप्रसक्तजयकाहलिकानिनादाकर्णननिर्वासितनिखिलारातिधरा-

---

* B 10642 D 4611 T. M. S. S. M. Library, Thanjavur.

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पतेः स्फारवलयशासितुः विशेषतयाऽवन्तिपतेः गुणलुब्धैरखिलकलाविलाससदनैः, काञ्चीपुरनेतुर्भगवतो वरदराजस्य वसन्तोत्सवयात्रासमागतैः, निरसूयैश्च, रसिकलोकचूडामणिभिस्सामाजिकैः । अये भरताचार्य !

शब्दान्कानपि वर्जितान्वयकथान्सङ्गृह्य वीतत्रपाः
पद्यं पादचतुष्टयेन शनकैर्निर्माय दुर्मेधसः ।
सानन्दं विमृशन्त एव सशिरःकम्पं सरोमाञ्चम-
प्यस्मानाकुलयन्ति हन्त रसिकाः निष्कारणं दारुणाः ॥ ४ ॥

तद्रूपकेण दरपीडितपार्विकेन्दु-
निष्यन्दिनूतनसुधारससोदरेण ।
नृत्तप्रयोगविशदाद्यरसोत्तरेण
त्वं नो विकासय मनांसि विना विलम्बम् ॥ ५ ॥ (इति)

तत्कथं इदानीं घटताम्

(ध्यानं नाटयन्, स्मृतिमभिनीय)

अस्त्यस्तोकगुणो हिमाद्रिशिखरोत्सङ्गापतज्जाह्नवी-
साहङ्कारतरङ्गसङ्गसहजश्रीहारिसूक्तिक्रमः ।
किञ्चोन्मूलयितुं पुनश्च सुदृढीकर्तुं कलासु प्रभुः
सर्वज्ञो हरिदन्तविश्रुतयशाः श्रीनीलकण्ठाध्वरी ॥ ६ ॥

अपि च —

यस्मिन्क्षोणिभुजां सभासु विदुषामग्रेसरे जातुचित्
स्वातन्त्र्यं विविधं विवृण्वति निजं सर्वासु विद्यास्वपि ।
जायन्ते गगनप्रचोदितदृशः स्तव्योपलब्धक्रमाः
स्वेदाम्भःकणसिक्तसर्वतनवः दीनाः प्रतिद्वन्द्विनः ॥ ७ ॥

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तस्य भारद्वाजकुलजलधिकौस्तुभस्य कैयटव्याख्यानशिवतत्त्वरहस्याद्यनेकप्रबन्धनिर्मातुः अद्वैतविद्यागुरोः भगवत्याः परदेवतायाः पुरुषावतारस्य पवित्रकीर्तेः नीलकण्ठमखिनः तृतीयनन्दनेन तदीयचरणारविन्दपरिचरणलब्धनिखिलविद्येन तत्पुत्रतानुगुणसाहितीकेन गीर्वाणेन्द्रेण अभिनवनिर्वर्तितशृङ्गारकोशो नाम भाणः इत्यधुनैव खलु निवेदितं मधुरापुरादागतेन रङ्गकेतुना । तत्तमेव प्रयुञ्जानः सामाजिकहृदयमनुरञ्जयामि । सर्वं सुविहितं प्रस्तुतकार्यसाहाय्यविधायिना विधिना ।

यतः —

एषा रसज्ञा परिषद्वयं च
नाट्येषु दक्षाः, सरसः प्रबन्धः ।
उपस्थितो मन्मथमूलकन्दः
कालोऽपि लीलोपवनस्थलीषु ॥ ८ ॥

(नेपथ्याभिमुखमवलोक्य)

आः! कथमवतीर्णमेव अस्मदभिप्रायवेदिना भावेन रङ्गकेतुना!! कथानेतुः शृङ्गारशेखरस्य सुप्तोत्थितस्य भूमिकामादाय, रङ्गमन्दिरम् । तदयमेव सामाजिकान् विनोदयतु । (इति निष्क्रान्तः)

प्रस्तावना

(ततः प्रविशति शृङ्गारशेखरः)

शृङ्गारशेखरः — (शय्यागृहान्निर्गत्य, स्पर्शसुखमभिनीय)

सान्द्रैश्चान्द्रमसैः करैरपि न यः शक्यापहारः पुरा
शृङ्गारोऽपि कुहूमुखस्य शतशो यस्मिन्नभून्न्यक्कृतः ।

तथाहि —

स्पर्धन्ते च गतश्रियो रतिपतेर्वीर्येण तारागणाः
यात्यस्तं च पुराणरूप्यफलकच्छायाहरश्चन्द्रमाः ॥ ९ ॥

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अन्तं यान्ति समं तमांसि परितः कोकाङ्गनानां ज्वरैः
वाता वान्ति रतान्ततान्तवनिताश्वासोत्तरङ्गानिलैः ।

अपि च —

चन्द्रं पश्चिमशैलमस्तकतटीविश्रान्तमेते पुनः
कण्ठोद्ग्रीविरजीवितास्समभवन्दृष्ट्वा चकोराः पुरा ॥ १० ॥

पश्यैतानि च चक्रवाकमिथुनान्युन्नम्य मन्दं मुखा-
न्यन्योन्यं परिहृत्य सन्निदधते चिन्तातुरस्थां दशाम् ॥ ११ ॥

(पञ्च षट् पदानि गत्वा, पुरोऽवलोक्य)

कथं! कल्य एवास्मत्प्रियसुहृत् वसन्तकः सम्प्राप्तः । सखे! किं भवान् दीन इव लक्ष्यते? किं ब्रवीषि? किं दीन इवेति बहुमानवचनेन? ज्यायान् इवकारपदे एवकारः ।

यतः —

आगुल्फायतवेणिकां स्मितमुखीमाकर्णपूर्णेक्षणां
भारात्किञ्चिदुरोजयोरवनतां सन्दिग्धमध्योज्ज्वलाम् ।
तन्वीमुन्मदमल्लिकास्रगमनां सन्त्यज्य सारङ्गिकां
धत्ते जीवनमात्मनो विफलयन्दीनो विधेर्व्यत्ययात् ॥ १२ ॥ इति ॥

सखे! किन्निमित्तः सारङ्गिकापरित्यागः? किं ब्रवीषि? शृणु, सङ्ग्रहेण कथयामि । सा किल प्रकृतिकोपना, पूर्वेद्युस्तावत् निशायामेकपर्यङ्कशायिनी नायिकान्तरविषयं मदीयमुत्स्वप्नभाषित-मुपश्रुत्य, तत्क्षणसुलभक्रोधावेशपरवशा तत्कालगलितनिद्रेण मया मुहुर्मुहुरनुनीतापि पुनः पुनः अधुनैव "धिक् जाल्म त्वये"त्यवधीर्यैव मां, निर्गतेति । किं निखिलवारविलासिनीजनाहंप्रथमिका-सम्भाव्यमानयौवनसर्वस्वशालिनो भवतोऽपि चिन्ता? किं ब्रवीषि? सति मम रतिकान्ततन्त्रे साचिव्यधुरन्धरे त्वयि, न कापि चिन्तेति । भवतु । गच्छावस्तावत् प्राभातिकवेशवाटरामणीय-कावलोकनेन आत्मानं विनोदयितुम् ।

(इति कतिचित्पदानि गत्वा, प्राचीमवलोक्य)

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथ पुनः आखण्डलहरिदङ्गनावदनारविन्दविद्योतमानरत्नकलिकाशङ्कास्पदं दुरन्तविरहव्यथयादूयमानकोकमिथुनसङ्कटनौषधं उत्प्रवृद्धध्वान्तसन्ताननिमग्ननिखिलजगदुद्धरणबद्धकङ्कणभानुश्चण्डभानुः उदयाचलशिखरं अधिरूढः ।

तथाहि —

सन्ध्यारागविमिश्रगैरिकविभाहङ्कारहुङ्कारिणः
प्रेयांसः च कुविन्दपुञ्जमहसः सौदामिनीसोदराः ।
आवृण्वन्ति दिशो दशापि युगपत्पश्याग्रतो भास्वतः
सामिस्मेरसरोजकोरकरुचिस्पर्धास्पृशो भानवः ॥ १३ ॥

दक्षिणेन वृक्षवाटिकां, उत्तरेण सरांसि, प्रवृत्तेन पथा साधयतोरावयोः अदूर एव वेश्यावाटः । तदनेन सन्निहितेन पथा गच्छावः ।

(इति पदान्तरे स्थित्वा, दक्षिणतोऽवलोक्य)

पश्य तावदिमानि रमणीयानि —

उद्यद्दिवाकरकरव्यतिषङ्गलब्ध-
निर्निद्रतासुभगपङ्कजकाननानि ।

किञ्च,

उद्धूतहंसकुलपक्षपुटाभिघात-
कूजन्मधुव्रतकुलानि सखे सरांसि ॥ १४ ॥

अहो ! तिरश्चामप्यादिमरससर्वस्वानुभववैदग्ध्यम् ।

यतः —

अध्यास्य चक्रमिथुनानि मृणालडोलां
उत्सार्य दूरतरमेव वियोगखेदम् ।
पश्यन्त्यपाङ्गवलनैः प्रणयोत्तरङ्गैः
चुम्बन्ति सान्द्रमपि किञ्च परिष्वजन्ति ॥ १५ ॥

(कतिचित्पदानि गत्वा वेश्यावाटप्रवेशं रूपयन्)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सफलय सखे! नयननिर्माणपरिश्रमं विधातुः ।

स्वस्थानोच्चलितालकाः त्रिगलितप्रायोऽवतंसोत्पलाः
किञ्चिद्विश्लथकञ्चुकार्पितदृशः विस्रंसिकाञ्चीगुणाः ।
नीवीयन्त्रणसक्तपाणिकमलाः वाराङ्गनास्सङ्घशः
पश्यैता धुरि साङ्गभङ्गमधुना निर्यान्ति शय्यागृहात् ॥ १६ ॥

(पदान्तरे स्थित्वा, पुरोऽवलोक्य)

इयं पुनः अनङ्गमन्त्राधिदेवतेव मूर्ता सम्प्रदायविद्येव सौन्दर्यस्य, सङ्केतनमिव सरस्वतीरमणरमणीयसर्गशिल्पानां, अनल्पमिव फलं अखिलकामिजनपचेलिमसुकृतानां, विलाससदनमिव विभ्रमाणां, विजयवैजयन्तिकेव जगन्मात्रप्रभविष्णुविक्रमक्रमस्य मकरध्वजस्य, पुनरुक्तिरिव रम्भायाः, पर्याया इव फणिलोकतरुणीनां, रूपान्तरमिव शचीदेव्याः, संवाद इव रम्भायाः, विद्युदिव विग्रहवती, गृहीतजीविकेव च कला चान्द्रमसी, सञ्चारशालिनीव च रत्नशलाकिका, कटाक्षमात्रेणैव निखिलमपि जगदनङ्गपरवशं कलयन्ती काचित् इत एवाभिवर्तते ।

अस्याः किल —

उन्मृष्टकुङ्कुमविशेषकमुत्प्रबन्ध-
घर्मोदबिन्दुमधुरं मृदिताधरोष्ठम् ।
अत्यन्ततान्तनयनं वदनं कृशाङ्ग्याः
कस्यापि धन्यजनुषः सुकृतं व्यनक्ति ॥ १७ ॥

किं सस्मितं ब्रवीषि? कस्यापीति परोक्षवत् अभिधानाद्वरं "यूनो ममैव कृतिनः सुकृतं व्यनक्ति" इति चतुर्थचरणाभिधानमिति ।

(निपुणं निरूप्य) नन्वेषैव सा मम बहिश्चरी जीवकला चन्द्रकला!

सखे, तथैव त्वय्यपि किमाच्छिद्यते? अन्यदपि ब्रवीमि ।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

याक्द्भानुरुपैति लुप्तकिरणः प्राचेतसीं दिक्तटीं
यावद्भूवलयं तमांसि युगपन्निश्शेषमावृण्वते ।
उद्युङ्क्ते तुहिनद्युतिर्दिशि हरेर्यावन्निधातुं पदं
तावत्केलिनिकेतनेऽद्य पुनरप्यस्त्वावयोस्सङ्गमः ॥ १८ ॥

इति सङ्केतिता कथञ्चिदियं अधुनैव प्रेषिता ।

किं ब्रवीषि ? किमेषैव सा चन्द्रकला ! साधु त्वयाद्यतनमपि जीवनं सफलयता विटकुलमूर्धमकुटतटीषु वाम एव चरणः विन्यस्त इति । दूरे हि वाङ्मनसयोः, अस्या विपरीतरतिकौशलम् ।

तथा हि —

निश्वसिति नातिमात्रं
न श्रमकणिकाभिर्युनक्ति बहुलाभिः ।
न श्राम्यति पुरुषायितं
आतनुते दीर्घमायतैर्भणितैः ॥ १९ ॥

किं ब्रवीषि? किमतिशयं एनां रसज्ञो भवान् गृह्णातीति ।

(पदान्तरे स्थित्वा) सखे, पश्य! पश्य!!

एते तमीरमणसान्द्रकरावमर्श-
सम्पन्नजाड्यविवशान् शिखिनः कलापान् ।
आमूलमत्र तपनाभिमुखान्वितत्य
बालातपं शरणयन्ति गृहाङ्गणेषु ॥ २० ॥

[पदान्तरे स्थित्वा] इयं खलु त्वत्प्रियसुहृदः सारङ्गस्य जीवनाडी ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रम्यैरपाङ्गवलनैः कतिभिर्वचोभिः
अन्यान्परानपि विलासगतागतेन ।
मन्दस्मितेन च परानिति लीलयैव
तन्वी तनोति तरुणानवशानशेषान् ॥ २१ ॥

इयं पुनरन्या मधुकरिका निर्विण्णेवावनतमुखी तिष्ठति निर्वेदहेतुरस्याः विचारणीयः । सर्वमपि उक्तिप्रत्युक्तिकयैव स्फुटीभवति ।

(समीपमुपसरन्) अपि कुशलं भवत्यै ? किं ब्रवीषि ? कथमिव कुशलं वैदेशिकेन द्विजाधमेन वञ्चिताया इति ।

(खेदमभिनयन्) कथयतु भवती कदा कथं वा सुदती भुजङ्गकुलाधमेन केन कुसुमविशिखतन्त्रं विप्रतीपं कृतम् ? अधुनैव करोमि तस्य शिक्षाम् । किं ब्रवीषि ? कथयामि तावन्मन्दभाग्या । शृणु तावत् —

पूर्वेद्युः पश्चिमाचलमवतरति भगवति गभस्तिमालिनि, निखिलजगदन्तरयति तिमिरे, पूर्वाचलशिखरमारोढुमभिलषति शशलाञ्छने, शिरोगृहद्वाराङ्गणमध्यमध्यासीनां मामुपसृत्य, चम्पककुसुमचन्दनताम्बूलपटवासमुखैरूपहारैः, तत्कालोचिताभिः चाटूक्तिभिश्च विप्रलोभ्य पणपञ्चकमपि ताम्रमयं हस्ते दत्वा शयनागारमेव मया सह प्राविशत् । प्रविश्य, च ततो निखिलामपि निशां यथाकामं विहृत्य, स्वयं कपटनिद्रामनुभवन् , यावदहमपि रतान्तसुलभं निद्रासुखमनुभवामि, तावदुत्थाय, सारङ्गेण दत्तद्विशतनिष्कमूल्यं हारमादाय, निर्गतवानेव । ततोऽहमपि यथापुरं बुद्ध्वा, किमयमनामन्त्र्यैव मां निर्गतः, तदस्त्यत्र विचार्यमित्याभरणपेटिकामशोधयम् । ततो हारं न पश्यामि । एष वृत्तान्त इति ।

(स्वगतं) सम्यगियं प्रलोभिता द्विजाधमेन मानवती मधुकरिका । पणसंख्ययैव द्विजाधमादस्यां – अप्राप्यं फलं दशार्धं इति निश्चितमासीत् ।

(प्रकाशं) स किल द्विजाधमः विविधवेषभाषाभिज्ञाननिपुणः निखिलानपि वारसुन्दरीजनान् इत्थमेवाभिसन्धत्त इति श्रुतमेव मयापि पञ्चषदिनादर्वाक् । भवतु । “ चिरकालचोरः

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कदाचिल्लगतो''ति हि लोकवार्ता । सर्वमपि क्रमेण व्यक्तीभविष्यति । नातिमात्रं तव खिद्यतां हृदयम् । साधयाम्यहम् ।

किं ब्रवीषि? सत्सु वाञ्छिताधिकफलदातृषु भवादृशेषु, न कापि चिन्तेति । भवतु ।

(इति पदान्तरे स्थित्वा)

एषा किल विरलभूषाऽपि नन्दयन्ती नयनानि विटजनानां, विषमायुधविजयवैजयन्तिकेति विश्रुतनामधेया निजकनीयसीं चन्दनलतां पुरस्कृत्य द्वारवेदिकामध्यमध्यास्ते । तदेनां सम्भावयामि ।

सुन्दरि! दिष्ट्या वर्धसे कनीयसीतारुण्यारम्भेण ।

तथा हि —

निधत्ते कौटिल्यं चरणमधुनाऽपाङ्गसरणौ
पुरो धत्ते सीमावलयमुदयोद्युक्तकुचयोः ।
गतिश्छायां प्रायः प्रकटयति गन्धद्विपगतेः
क्रमोऽप्यस्या वाचामपहसति माध्वीमधुरताम् ॥ २२ ॥

अपि च —

तनीयस्यग्रेव स्फुरति जठरे रोमलतिका
विहाय स्वाच्छन्द्यं दृगपि च भिया मान्द्यमयते ।
किमुक्त्या भूयस्या प्रतिपदममुष्या वरतनोः
उदेति प्रत्यङ्गं कलमसुपमा काप्यभिनवा ॥ २३ ॥

कः कौमारहरोऽभिमतश्चन्दनलतायाः ?

किं ब्रवीषि? किं न श्रुतं भवता विटकुलतिलकस्सारङ्गः इति ।

(सशिरःकम्पं)

आकारसम्पदि विलासगतौ पटूक्तौ
वित्ते कलासु सकलासु वदान्यतायाम् ।

T J- CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पन्वेपुविक्रमपदे च दशाविशेषे
पश्यामि नास्य विमृशन्नपि तुल्यमन्यम् ॥ २४ ॥

अपि च —

वाणीव प्रथितमना गुणः कवीनां
एषा तं रमयतु सोऽपि चास्तु धन्यः ।
अन्योन्यानुगुणप्रबन्धसृष्टि-
व्यापारः फलतु विधातुरप्ययत्नम् ॥ २५ ॥

साधयाम्यहम् । [इति पदान्तरे स्थित्वा, वसन्तकं प्रति]

किं ब्रवीषि ? वयस्य, सारङ्गक इत्यनेन स्मारितोऽस्मि ।

अपि सा सारङ्गिका कथञ्चिदपि मया लभ्या ?

राकासुधाकरमुखीं दिवसावसान-
निर्णिद्रनीलसरसीरुहपत्रनेत्राम् ।
उत्तुङ्गपीनकुचकुम्भभरानताङ्गीं
आलिङ्ग्य गाढमपि निर्वृणुयां मृगाक्षीम् ॥ २६ ॥

इदानीं हि —

दृष्टिः पुरस्थमपि वस्तु न मे विविङ्क्ते
चेतो विनाशमयते नितरां विषण्णम् ।
अङ्गान्यनङ्गशरजालखिलीकृतानि
सत्यं ब्रुवे न वशमद्य मम प्रयाति ॥ २७ ॥

मैवमतिमात्रमायासितव्यम् ।

(पुरोऽवलोक्य)

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

करकलितकेलिपद्मा
चरणरणन्मञ्जुमञ्जीरा ।
गतिविजितराजहंसा
तरुणी केयं समायाति ॥ २८ ॥

(पुनर्निरूप्य) नन्वेषैव सारङ्गिका !! भवतु । एनमनया सङ्घट्टयामि । (इति समीपमुपसर्पन्)

सखि, सारङ्गिके, कुत्र प्रस्थितासि? कथमियमदृष्ट्वैव मां, त्वरितपदमपसरति?
(मार्गं निरुध्य) समीकरिष्ये । (इति मार्गे स्थित्वा)

मन्दं निधेहि मदिराक्षि, पदानि मध्ये
वक्षोजयोर्न सहते भर एष तेऽद्य ।
क्रोधं विधूय विकचोत्पलकाननश्री-
संवादिभिः सकृदमुं कलयाक्षिकोणैः ॥ २९ ॥

(इति तमन्तिकं नयति)

किं ब्रवीषि? किमज्ञातवृत्तान्तेनेव भवता समाधीयते? अलमेतत् । कथयामि ।
वार्यतामयं प्रसङ्ग इति ।

(अपवार्य) अयि मुग्धे !

मञ्जीरनादमधुरं चरणप्रहारः
काञ्चीलताकलितकोमलबन्धनं च ।
भ्रूभङ्गसामिविषमश्च कटाक्षभेदः
स्वामिष्वनङ्गनिगमादृत एष दण्डः ॥ ३० ॥

तदत्यर्थं धनिनि वसन्तके न कामतन्त्रविरुद्धमाचरणीयं भवत्या (इति सस्मितमुभयोर्हस्तौ योजयन्) इयमाशीः । कुसुमविशिखप्रसादात् युवयोरनुरूपरूपयौवनयोः अदिवारात्रविभागं निष्प्रत्यूहं सराहवो भूयात् ।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

किं ब्रवीषि? अनुलङ्घनीयं हि भवद्वचनं वामभृगीदृशां, विशिष्य ममैवेति? साधयाम्यहम् ।

(इति पदान्तरे स्थित्वा) एषा खलु काममञ्जरी कामसम्मोहकलेव मूर्तिमती, विशदयितुमिव द्विगुणमाभिरूप्यमङ्गानां, सूक्ष्मं किमप्यम्बरं परिदधाना, दधाना च दक्षिणेतरेण करकिसलयेन कलमधुरभाषिणं कमपि शुकशावकं, विदधाना च दूरतः दक्षिणकरगृहीतेन लीलारविन्देन अभिजातवदनसौरभसर्वस्वास्वादनपर्याकुलं मधुपकुलम्, विनैव मथनं, आदिमरत्नार्णवात् उत्तीर्णेव लक्ष्मीः प्रतिक्षणमपि सफलयन्ती नयनानि तरुणानां, सविधभुवमवतरति सीमन्तिनी ।

किमेषा सर्वस्वं रतिरमणतन्त्रस्य तरुणी
कराणामिन्दोः किं प्रकृतिललितानां समुदयः ।
अनल्पं किं शिल्पं निखिलललनासृष्टिषु विधेः
ममैव स्फाराणां कलमसुकृतानां किमु गुणः ॥ ३१ ॥

[नर्मीणमुपसर्पन्] अपि कुशलं भवत्यै ?

किं ब्रवीषि? अद्य मदनागमदेशिकस्य भवतः प्रसादेनेति । अलमतिमात्रया बहुमानास्थया, किं ब्रवीषि? चिराय दृष्टः प्रियवयस्य इति । कृतं पर्यायोपालम्भेन ।

उद्बुद्धमुग्धसरसीरुहदर्शनीयं
उत्तम्भितालकमुदञ्चितमन्दहासम् ।
अव्याजसुन्दरमिदं वदनं त्वदीयं
आलोकये हृदि सदा नियतं ब्रवीमि ॥ ३२ ॥

सखि, कुतस्त्योऽयमभिनवः शुकशावकः ?

किं ब्रवीषि? त्वत्प्रियसुहृदा मधुकरेण द्वीपान्तरादानीतोऽयमिति मह्यमुपहारयता ।

सकृदुच्चरितं सर्वं गृह्णाति धिषणाबलात् ।
शास्त्रविद्भ्योऽपि सुव्यक्तं वक्ति श्रुतिमनोहरम् ॥ ३३ ॥

[सश्लाघं] अस्य गुणोऽपि कथितः । [सशिरःकम्पं]

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सखि, कुत्राप्यदृष्टचरमीदृशं शुकजातिषु व्यक्तवचनत्वम् ।

मुक्तश्शुकः इति वागपि
मिथ्येत्यधुनैव निर्णयो जातः ।
बन्धसरणिं भवत्या
गमितो यस्मादयत्नमेव शुकः ॥ ३४ ॥

किं ब्रवीषि ? कामतन्त्र इव कवितायामपि महद्वैदग्ध्यं वयस्यस्येति ।

(विहस्य)

भूयानस्ति परिश्रमो रतिपतेस्तन्त्रेषु, मे साहिती
स्वाधीनैव कणादगौतममताध्वन्यध्वनीनोऽस्मि च ।
तन्त्रे जैमिनिबादरायणकृते स्वातन्त्र्यमन्यादृशं
किन्त्वेका गणिकावशीकृतिकला नाद्यापि विज्ञायते ॥ ३५ ॥

किं ब्रवीषि ? सत्यमाह भवान् । तथा हि —

कुमारो बालो वा भवतु तरुणो वाथ दशमी
विदग्धो मुग्धो वा विकलकरणो वाथ मदनः ।
वदान्यो रागान्धः समधिकधनो यस्य सकलः
जनो, वारस्त्रीणामखिलगुणसान्द्रः परिवृढः ॥ ३६ ॥

त्वया तु निखिलगुणाकरेण, सर्वा वयं वारविलासिन्यो वशीकृता एवेति ।

[पदान्तरे स्थित्वा, पुरोऽवलोक्य] कोऽयमकाण्डे बहुजनसमाजः ! [सत्वरं कतिचित्पदानि गत्वा, पुनर्निर्वर्ण्य]

इदं खलु, परितोऽपि पलायनपर्याकुलजङ्घाकरिकजनसम्बाधं ऊरीकृतजरतिगणोद्धरणनिपुणपौरकृतहाहारवमुखरं अतिमात्रचकितमत्तकाशिनीकुलाकलितयादृच्छिकगाढपरिष्वङ्गविहितपरितोषपरिहृतविरहव्यथतरुणं कुतूहलाद्वृक्षारूढपौरजनप्रसाधितसौधमण्डलं प्रमत्तनैगमपरित्यक्तपण्यवीथि-

J-

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कासर्वस्वहरणप्रवृत्तयामिककुलं पर्याकुलकुब्जवामनजनप्रविष्टभवनजलनिर्गमद्वारं मन्दुरापरिभ्रष्टतुरगनिकरखुरपुटदलितमहीरजस्स्थगितदशदिशामुखमजायत राजरथ्यामुखमुखम् ।

सखे, वसन्तक, कथमतर्कितोपनतमत्याहितम् । पश्य,

यन्तारं सविधस्थमग्रचरणग्राहं मुहुर्भ्रामयन्
आस्फाल्यैव शिलातले पितृपतेः कृत्वाऽतिथिं तत्क्षणात् ।
मत्तः कोऽपि मतङ्गजः सुमहतीं कर्षन्नयश्शृङ्खलां
आयात्यग्रत एव रोषकलुषः मुक्तस्स्वयं बन्धनात् ॥ ३७ ॥

तदिदानीं न युक्तमत्र स्थातुमस्माभिः ।

[इति दूरतो गमनमभिनयन्, पुरोऽवलोक्य]

इयं खलु नूतनाभिसारप्रवृत्ता कुलवधूमार्गनिष्ठा वासन्तिका! मामवलोक्य सत्वरं प्रविशति ।

किं ब्रवीषि? इयमपि भवता वशीक्रियत इति किंवदन्ती श्रूयते । अथ, किमनुभूयते वासन्तिकया सह नववधूविस्रम्भणविनोदः इति ।

सखे, संवरणं तत् । संवननसरणिमवतीर्णैव सा । तरुणीरीतिरियं, प्रदर्श्यते । सर्वमन्यदवधार्यताम् ।

मध्यालिङ्गितुमुत्सुके वितनुते वक्षोजयोस्स्वस्तिकं
सक्रोधं वदनं नयत्यपरतो बिम्बाधरं वाञ्छति ।
नीवीमोचनलालसं सशपथं रुन्धे करं मामकं
दूरेऽभीष्टमथापि मे सुवदना दत्ते रतिं कामपि ॥ ३८ ॥

कथमधुनैव गगनाङ्गणमध्यमारूढो देवो दीनबन्धुः ।

उपस्थितमपि मध्याह्नं वेश्यावाटपर्यटनव्यसनेन नोपलब्धवानस्मि ।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथा हि —

गाहन्ते श्रुतिसम्पुटीं मधुकराः त्यक्त्वा कटं दन्तिनां
पान्थाः पादपमूलकुट्टिमतटीं श्रान्ताः परिष्कुर्वते ।
लीयन्ते तरुकोटरेषु विहगाः सन्त्यज्य वाचालतां
सान्द्रं चन्दनकर्दमं मृगदृशः कुर्वन्ति वक्षोजयोः ॥ ३९ ॥

अपि च —

भानुः स्फालतलं गभस्तिभिरयं भिन्ते नभोमध्यगः
पन्थानश्चरणौ दहन्ति दहनज्वालोष्मलैः पांसुभिः ।
तामेवान्तरनुक्षणं कलयतस्तन्वीं मनोजन्मनः
सर्वाणि ज्वलयन्ति हन्त विशिखा यत्सत्यमङ्गानि मे ॥ ४० ॥

किं ब्रवीषि ? भाव, परिश्रान्तोऽसि । तदत्रैव माधवीसदननातिदूरवर्तिनि वसन्तावताररमणीये बालवकुलोद्याने दिनयौवनमतिनीयतां भवतेति । यथा रोचते भवते इति ।

(उद्यानप्रवेशं रूपयित्वा)

सखे, वसन्तावताररमणीयतेति सत्यमाह भवान् । तथा हि —

कण्ठे कोकिलसुभ्रुवां पदपथं धत्तेऽधुना पञ्चमः
चित्रैरेष परिष्कृतो किसलयैरारग्वधो दृश्यते ।
स्पन्दन्ते परितोऽपि मन्दमरुतः पाटीरशैलाङ्गण-
क्रीडत्किन्नरकामिनीगलमिलत्कस्तूरिकागन्धिनः ॥ ४१ ॥

(कतिचित्पदानि गत्वा, पुरोऽवलोक्य) पश्य सखे पश्य ।

इदं पुनरविरलवकुलानोकहनिरन्तरप्रच्छायसुखनिषण्णहरिणीमिथुनारब्धरोमन्थं, मधुरमाधवीलतालिङ्गनसफलीकृतसहकारयौवनं, यौवनमदमत्तमत्तकाशिनीजनचरणाघातसद्यःकुसुमिताशोकं, सासूयवलमानविलासिलोचनं पुष्पापचयव्यग्रबालचम्पकशाखाधिरूढबालिकाजनोरुमूलदर्शनोत्तानितनयनविटवटुकं, पचेलिमकपित्थफलग्रहविशृङ्खलवलमानवलीमुखकोलाहलकान्दिशीकशुककुलं,

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

याद्दच्छिकासङ्गपरिहृतप्रणयकोपं, प्रत्यग्रदलिततललिततबकुलतमालतिलककुलकिसलयास्वादकषायकण्ठपञ्चमध्वनिपरभृतविरहिजीवनं निर्निद्रविविधानोकहस्तवकनिस्सरन्मकरन्दधारानिपातशीतलितालवालमूलसुखनिषण्णकामिनीजननखमुखमुखरितवल्लकीनिनादसमाकर्णनोन्मुखस्तब्धहरिणतर्णकं, विरहानलदह्यमानमानिनीजनपरित्राणप्रवणपरिचारिकानिकरभज्यमानसरसहकारपल्लवोड्डीनमधुकरकुलझङ्कारमुखरं, अविरलविलम्बिनवमालिकास्तबकपरिष्कृतलतागृहसुखनिद्राणयौवतनिश्वासमांसलवलमानमलयपवमानं भुवमवतीर्णमिव नन्दनोद्यानमुद्यानम् ।

किं ब्रवीषि ? यथा समर्थयसे ।

विकस्वरपिकस्वरं विवलमानमन्दानिलं
विवृद्धनवचम्पकं विकचमल्लिकाकोरकम् ।
विनिद्रनवमालिकामधुमदान्धपुष्पन्धयं
सखे हरति योगिनामपि मनोज्ञं वनम् ॥ ४२ ॥ इति ।

(कतिचित्पदानि गत्वा, विलोक्य)

अत्र हि —

आमुच्य हारमवमुच्य निचोलमङ्गा-
न्यालिप्य चन्दनरसैर्घनसारसान्द्रैः ।
वाराङ्गनाः स्वगृहकुट्टिमसन्निविष्टाः
द्यूतं विटैस्सपणकं समुपक्रमन्ते ॥ ४३ ॥

(समीपमुपसर्पन्)

कथं मन्दारिकाकलहंसयोः द्यूते महान् विवादः ?

कलहंस किं ब्रवीषि ?

जये दृढालिङ्गनमन्यथा तु
पादप्रहारः पणितोऽनया मे ।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पराजयं मय्यधुना त्वसन्तं
आरोपयत्याकलय त्वमेव ॥ ४४ ॥ इति ॥

मन्दारिके, किं ब्रवीषि ?

अक्षौ करे मे विजयावसानात्
द्यूतक्रियाऽऽसीदुभयोस्समाना ।
जयः किमीर्योऽपजयः किमीर्यः
तत्त्वं वद त्वं परिहृत्य शङ्काम् ॥ ४५ ॥ इति ॥

(कलहंसं प्रति अपवार्य)

नातीव जयापजययोः व्यत्यासः ।

मुग्धोऽसि, मास्तु कलहो युवयोः, वद त्वं
आलिङ्गनान्मयि वरः चरणप्रहारः ।
उद्धृत्य पापमुररीकृतनिग्रहायाः
किञ्चोरुमूलमवलोकय कोपनायाः ॥ ४६ ॥

(पदान्तरे स्थित्वा, विलोक्य)

सखे, इतः पश्य, लतामण्टपे —

एषा सव्येतरांसानतमुखकमला स्रंसमानावतंसा
वीणामुत्तुङ्गवामस्तनतटनिहितां वादयन्ती नखाग्रैः ।
धन्यैः पुञ्जीभवद्भिर्विटकुलतिलकैस्सादरं स्तूयमाना
गायन्ती मानसं मे कलयति नियतं निश्चलं चित्रलेखा ॥ ४६ ॥

(पदान्तरे स्थित्वा, पुरोऽवलोक्य)

इयमपरा वामकरतलविन्यस्तवदनकमला, हृदयगतदयितश्वासेनेव द्विगुणितैः श्वासपवमानैः सद्योदलितविद्रुमशकललोभनीयमधरदलं ग्लापयन्ती, निरर्गलवहद्भिर्बाष्पसलिलैः सनिर्झराविव

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कुचशिखरिणौ कलयन्ती, परिणतलवलीलतागर्वसर्वङ्कषैरङ्गैः, एकस्मिन्नपि पुरुषधौरेये हृदयङ्गमेऽति-वेलमनुरागमापादयन्ती, हृदयनिर्विशेषैस्सखीजनैः आवश्यकेषु कार्येषु पुनः पुनरनुयुक्तापि प्रतिवचन-मकथयन्ती, तत्क्षणोन्मीलितमाधवीलतेव परिम्लाना, वनभङ्गकुशेव वनदेवता, विधुन्तुदगृहीतेव विधुकला, कमलाकरश्रीरिव प्रालेयदूषिता, कापि हरिणेक्षणा नियतमतिमात्रं विपद्यते । तदेनां विचारयामि ।

(इति समीपमुपसर्पन्, पुनः निरूप्य)

नन्वेषैव पद्मावती! अहो महान्प्रमादः । यदेषा निस्संज्ञा मूर्छितेव । सख्यो, न भेतव्यं, न भेतव्यम् ।

तन्वीं वीजयत द्रुतं कमलिनीपत्रैरनङ्गातुरां
एनां सिञ्चत चन्द्रकान्तकलशानीतैस्तुषाराम्बुभिः ।
तल्पं कल्पयत प्रतिक्षणसमानीतैः प्रसूनोच्चयैः
बाह्वोरङ्गदकङ्कणानि कुरुत क्षिप्रं मृणालाङ्कुरैः ॥ ४८ ॥

(खेदमभिनयन्)

पञ्चेषोरधुना जगत्सुपरतस्त्रैलोक्यशिक्षाक्रमः
शान्ता माधवचञ्चरीकशशभृन्मन्दानिलानां कथा ।
प्राप्तोऽतर्कित एव हन्त युगपद्भाग्यक्षयः कामिनां
एषा यत्तरुणी गतेव सहसा दीनां दशामीदृशीम् ॥ ४९ ॥

(पुनर्निरूप्य) दिष्ट्या प्रत्यापन्नजीवना मे जीवनाडी पद्मावती ।

तथा हि —

मन्दं मन्दमुदेति सौरभघनश्वासोऽनुमेयक्रमः
नेत्रे कुड्मलतां क्रमात्कुवलयप्रस्पर्धिनी मुञ्चतः ।
उद्युङ्क्ते वदनं प्रसादमयितुं नाद्याप्यहो गाहते
किञ्चित्किञ्चिदिवाधुना वरतनोर्दोरन्तरं स्पन्दते ॥ ५० ॥

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अयि भोस्सख्यः ! केन विटाधमेन इयमीदृशीमवस्थां नीता ?

किं ब्रूथ ? किं न विदितं वसन्तोत्सवमनुसन्धातुं कुसुमपुरं गतेन मकरन्देनेति ।

(पद्मावतीं विलोक्य)

नातिमात्रमरविन्दलोचने
खेदमावहतु तावकं मनः ।
नन्वसौ कुसुमबाणशासनात्
आगमिष्यति पतिस्तवाचिरात् ॥ ५१ ॥

लोकरीतिमनुरुध्य इयमुक्तिः । मम तु मतिरन्यादृशी । शृणु, श्रावयामि —

यस्य प्राथमिकश्शरः सुवदने पादेन ते निर्जितः
निश्वासेन रथो, धनुश्च वचनैर्निस्सारतां लम्भितम् ।
मौर्वी मेखलया, मुखेन च जितं च्छत्रं स पत्या स्मरः
योक्तुं त्वामभिभूतजन्यकरणग्रामः कथं कल्पताम् ॥ ५२ ॥

किं ब्रवीषि ?

पद्येन नूतनोल्लेखमधुरेण तवामुना ।
निर्विण्णमपि मच्चेतः सहसैव प्रसीदति ॥ ५३ ॥ इति ॥

सखी रसज्ञासि धन्यो-
स्म्यहमपि तुष्टस्त्वत्परितोषेण ।
रसज्ञजनपरितो-
षोपपाद्यफलाः खलु कविवाचः ॥ ५४ ॥

[पुरोऽवलोक्य] सखि, कथं स्मृतमात्रसन्निहितो मकरन्दः ।

बद्ध्वा बाहुलताभ्यां
गाढं वक्षस्यमुष्य कुचकलशौ ।

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मञ्जय सागसमेनं
कान्ते निश्शङ्कमाधरससिन्धौ ॥ ५५ ॥

[इति तमन्तिकं नीत्वा]

सखि, सुखं स्थीयताम् ।

[इति पदान्तरे स्थित्वा, अग्रतो निर्वर्ण्य]

इयमपरा कन्दुकेन क्रीडति ।

तिष्ठन्ती क्षणमभितस्ततो भ्रमन्ती
गच्छन्ती तदनु ततः परापतन्ती ।
सव्यानं कुचकलशौ मुहुर्नयन्ती
बालेयं नटयति कन्दुकं करेण ॥ ५६ ॥

[समीपमुपसृत्य]

व्यालोलच्छ्रुतिकुण्डलं परिणमद्धर्माम्बुगण्डस्थलं
भूयो नृत्यदुरोजकुम्भमयथाविन्यस्तकेशोच्चयम् ।
श्वासप्रेङ्खितहारमिन्दुवदने, ते कन्दुकक्रीडितं
व्यत्यस्तं कथयत्यनङ्गसमराकल्पं त्वदीयं मम ॥ ५७ ॥

किं ब्रवीषि ? नाहं त्वद्विलासवचनचातुरीलालिताभिरूप्यकला चन्द्रकला । सा पुनरधुनैव चरणायुधद्वन्द्वयुद्धं अवलोकयितुं गता । तत्रैव साधयेति ।

[आत्मगतं] मदभिमतमेवोपदिष्टमनया । [प्रकाशं]

त्वमेव मे सुवदने, हृदयं जीवितं धनम् ।
इति मे निर्व्यलीका धीस्तव त्वन्यादृशी मतिः ॥ ५८ ॥

किं ब्रवीषि ?

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

निसर्गकुटिला लोके विगोत्रा वारयोषितः ।
ता अपि भ्रमयन्त्येषा निर्यत्नं वञ्चना तव ॥ ५९ ॥

वञ्चनामिमां त्वदन्तिकोपचरः वसन्तकः एव जानातीति । भवतु, साधयामि ।

(इति कतिचित्पदानि गत्वा, ऊर्ध्वमवलोक्य)

शान्तप्रायस्तपनातपः । तथा हि —

सौधान्तःस्थितिमाकलय्य शिथिलां पारावताः पञ्चषाः
सेवन्ते शनकैस्सुधातिधवलां रम्यां विटङ्कस्थलीम् ।
एते तीरनिरूढवञ्जुलतरुच्छायां त्यजन्तोऽधुना
हंसाश्चावतरन्ति पङ्कजवनीस्साकं प्रियाभिः पुरः ॥ ६० ॥

(पदान्तरे स्थित्वा, पुरोऽवलोक्य)

कथमासन्नं चरणायुधरणमवबुध्य, मिलिता निखिला अपि वारविलासिन्यो मदागमनं प्रतिपालयन्ति ।

(त्वरितगमनमभिनयन् जनसम्मर्दं रूपयित्वा, कतिचित् पदानि गत्वा)

मुक्तोऽस्मि जनसम्मर्दात् । सखे, वसन्तक,

सम्मर्दमत्र विनिवारयतेव पाणिं
एणीदृशामुरसि कल्पयता मयाद्य ।
दिष्ट्या मदान्धकरिकुम्भविलोभनीय-
वक्षोरुहग्रहणमङ्गलमन्वभावि ॥ ६१ ॥

किं ब्रवीषि ? कस्त्वामन्तरेण तत्तत्कालोचितमादिमरसमास्वादयितुं प्रभुरिति ।

(पुरोऽवलोक्य) अद्यापि नातिक्रान्तश्चरणायुधरणः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अतः —

पक्षौ वितत्य समुदस्य च कण्ठकाण्डा-
वन्योन्यवक्त्रविनिवेशितदृष्टिपातौ ।
एतौ स्वनाथकथितस्तुतिसम्प्रहृष्टौ
सन्नह्यतो रणकृते धुरि ताम्रचूडौ ॥ ६२ ॥

(पुनर्निरूप्य) हन्त, प्रवृत्त एव रणः ।

अन्योन्यचञ्चुपुटकुट्टनभिद्यमान-
मौलिस्रवद्बहुललोहितलोहिताङ्गौ ।
अप्यन्तिकस्थनिजनाथजनैर्निरुद्धा-
वेतौ सरोषमभिषेणयतोऽत्र चित्रम् ॥ ६३ ॥

(दक्षिणतो निर्वर्ण्य)

अत्र च —

शृङ्गाग्रगाढघटितायसशृङ्खलानां
आशामुखानि निनदैः परिपूरयन्तौ ।
आयोधनं रचयतो यशसां निधानं
एतावदभ्रतररोषभृतावुरभ्रौ ॥ ६४ ॥

अपि च —

परस्परतुलां गतावधिकरोषरक्तेक्षणौ
खुराग्रदृढकुट्टनैर्वसुमतीं खनन्तौ मुहुः ।
सुदूरमपसृत्य सत्वरमहो मिलन्ताविमौ
रणं रचयतो नृणां कुतुकमादधानावितः ॥ ६५ ॥

(उत्तरतोऽवलोक्य, निर्वर्ण्य)

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अयं पुरस्ताडितजैत्रडिण्डिमः
प्रशस्यमानोऽनुचरैः पदे पदे ।
पिनद्धकक्ष्योऽतिवली जितश्रमः
विलोक्यते कश्चन मल्लशेखरः ॥ ६६ ॥

(पुनरवलोक्य) अयमपि तत्परिपन्थी वीरसेनः ।

समुच्छ्रितजयध्वजो वटुगणैः पुरः कम्पयन्
महीं चरणचङ्क्रमैर्विमतसिन्धुविन्ध्योऽहितः ।
दिशावलयमक्षिभिर्भ्रुकुटिभीषणैः पूरयन्
कृतान्त इव मूर्तिमान् सकुतुकं जनैरीक्ष्यते ॥ ६७ ॥

नूनमनयोर्मेरुमन्दरयोरिव जङ्गमयोः, चिरकालबद्धवैरयोः हरिणसिन्धुरयोरिव मूर्तिमतोः इतरेतरजयैकफलयोः अवन्तिराजसमक्षं आसन्नेन द्वन्द्वयुद्धेन भवितव्यम् । तत्, तत्रैव साधयन्ना-पादयामि नयनयोस्साफल्यम् ।

(इति कतिचित्पदानि गत्वा, पुरोऽवलोक्य)

हन्त, कथमनयोः सन्निहितप्रायमायोधनम् । सखे, दृश्यतां द्रष्टव्यम् ।

कृत्वाञ्जलिं स्वगुरवे प्रथमं करेण
सव्येतरेण जतुमुष्टियुगं गृहीत्वा ।
द्वन्द्वाहवप्रणयिराजकृताभ्यनुज्ञं
मल्लद्वयं भ्रमति मण्डलचङ्क्रमेण ॥ ६८ ॥

अपि च —

एतौ धीरावपीदृग्युगविगममिलत्पुष्करावर्तकादि-
प्रख्याताम्भोदघोषस्तनितसहचरैर्गर्जितैस्तर्जयन्तौ ।
ऊर्वोरास्फालयन्तौ मुहुरहिपतिवन्मांसलाभ्यां भुजाभ्यां
युध्येते वीरवर्यौ दृढतरजतुमुष्टिप्रहारैरुदारैः ॥ ६९ ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अलमनेन परव्यसनावलोकनकुतूहलेन । साधयामस्तावत् ।

(इति कतिचित्पदानि गत्वा, पुरोऽवलोक्य)

सखे, दृश्यतामिदं आश्चर्यम् !

कृत्वान्तर्हितमञ्जनैः कचगतं पालित्यमत्युन्नतौ
वक्षोजौ विरचय्य कञ्चुलिकया क्षौमादृताकुण्ठना ।
फाले कौङ्कुमलाकलय्य तिलकं श्यामोचितैश्चेष्टितैः
ग्रामीणानिह कापि वारजरती वश्यान्विधत्ते जनान् ॥ ७० ॥

किं ब्रवीषि ? उदरभरणमात्रपरितुष्टान् द्विपात्पशून् ग्रामीणान्वारजरती वञ्चयतीति किमत्राश्चर्यमिति ।

(पुरोऽवलोक्य)

कोऽयमतिकृपणः, पाटच्चरपरिधानः, भामापरिगृहीतनिखिलापधनः, शिखायज्ञोपवीतमात्रानुमेयब्राह्मण्यः, भ्रमरिकया कलहायमानः, इत एवाभिवर्तते ।

(पुनर्निरूप्य) हन्त, गतस्सन्देहः । अयमसौ रुद्रभट्टः । (रुद्रभट्टं प्रति) कथमपरिमेयधनशालिनोऽपि भवतः ईदृशो वेषः, कलहश्च ? (रुद्रभट्टं प्रति) किं ब्रवीषि ?

बाह्यं धनं व्ययितमेव हि सर्वमस्यै
विश्राणिता कतिपयैर्दिवसैश्च नीवी ।
दीनोऽस्मि, भोक्तुमपि दुर्लभमन्नमासीत्
एषा तु मां मशकवन्मनुते मृगाक्षी ॥ ७१ ॥ इति ॥

सखे, नूनमनभिज्ञोऽसि मदनव्रतचर्याक्रमस्य । सति किल अभिमतदानधुरन्धरेऽस्तैव-सुरपादपे, भवता नेदृशो वेषः वोढव्यः ।

(पदान्तरे स्थित्वा, पुरोऽवलोक्य)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अधिकुचकलशं प्रियेण दत्तम्
नखपदमानतवक्त्रमीक्षमाणा ।
जयति मनसिजेन जेतुमेतत्
जगदखिलं नमिता धनुर्लतेव ॥ ७२ ॥

(पुरोऽवलोक्य)

कथं सायन्तनप्रसाधनप्रवृत्ताः सर्वा अपि वारविलासिन्यः !! आसां किल —

सिन्दूरन्ति कुरङ्गशावकदृशां सीमन्तरेखान्तरे
वीटीयन्ति अधरेषु सान्द्रघुसृणं लेपन्ति वक्षोजयोः ।
दीव्यद्धाटकहंसकन्ति चरणाम्भोजेषु, रक्तांशुक-
न्त्यङ्गेषु अस्तमुपेयुषः कमलिनीबन्धोस्त्विषां पङ्क्तयः ॥ ७३ ॥

अधुना हि —

अस्तं याति सरोजिनीपरिवृढस्साकं सरोजश्रिया
प्रोन्मीलन्ति मनोरथैरविकलैर्यूनां च शङ्खस्वनाः ।
कोकानां विगलन्ति वारसुदृशां मानैस्समं सम्मदाः
सन्नाहेन रतीशितुः प्रतिगृहं रोहन्ति दीपाङ्कुराः ॥ ७४ ॥

अपि च —

अस्तमुपेयुषि भानौ
तापो भूत्वा निराश्रयो नूनम् ।
अङ्गेषु पान्थयूनां
लीनः कुसुमेषुविशिखदग्धेषु ॥ ७५ ॥

(समन्तादवलोक्य)

J-

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हन्त, कथमचिरादेव अन्धतमसो जगदन्धीकरणधुरन्धरता ।

यत: —

अस्तं न यावदुपयाति सरोजबन्धुः
सान्ध्यो न यावदुपशाम्यति राग एषः ।
तावद्वसन्तक, तमांसि कथं जगन्ति
रुन्धन्ति सन्निहितवस्तुववबोधशून्यम् ॥ ७६ ॥

(पदान्तरे स्थित्वा, पुरोऽवलोक्य)

एताः खलु मूर्ता इव कामकलाः, नीलांशुकविहितावकुण्ठनाः, चन्द्रोदयशङ्काकुलाः, मदालसलीलागतिदरोच्चलितमेखलाङ्गदकटकतुलाकोटिकनकवलयमञ्जुशिञ्जिताकर्णनपरितुष्टपल्लविक-कुलकान्तसङ्केतभवनमभिसरन्त्यभिसारिकाः ।

निर्णिद्रतां कुमुदकोकनदोत्पलेषु
कुर्वन्दृढानि दलयन्परितस्तमांसि ।
कीर्तिं स्मरस्य विकिरन्ककुभां मुखेषु
ज्योत्स्नाच्छलेन समुदेति शनैश्शशाङ्कः ॥ ७७ ॥

इन्दावभ्युदिते, मधौ च विपिने लब्धास्पदे, मारुते
मन्दे, स्वीकृतचङ्क्रमे पिककुलैरङ्गीकृते पञ्चमे ।
झङ्कुर्वत्यपि षट्पदे, रतिपतौ सन्नद्धबाणासने,
किम्पाकाः कलयन्तु सम्प्रति सखे, पर्यस्तभाग्यक्रमाः ॥ ७८ ॥

(पदान्तरे स्थित्वा)

इदमिह चन्द्रकलायास्सदनम् । तदहमत्रैवानया सह निशामिमां सफलयामि । त्वमपि वयस्य, सारङ्गिकोपभोगेन सफलय निजजीवितम् ।

(इति तं विसृज्य, चन्द्रकलाभवनप्रवेशं रूपयित्वा, पुरोऽवलोक्य)

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मूर्तिमती रूपकला
जीवकला किं ममाथ भाग्यकला ।
इति संशयमारूढा
चन्द्रकलेयं पुरस्समायाति ॥ ७९ ॥

(चन्द्रकलामालिङ्ग्य)

किं ते सुदति भूयः प्रियमुपहरामि? अथापि इदमस्तु भरतवाक्यम् ।

भूयादस्खलितक्रमा रतिपतेराज्ञा कुले कामिनां
भक्तिः कामदुघा जनस्य सुदृढा भूयाद्भवानीपतौ ।
एधन्तां चतुराननेन्दुवदनापादारविन्दक्वण-
न्मञ्जीरध्वनिमञ्जुलाश्च जगदुत्सङ्गे कवीनां गिरः ॥ ८० ॥

॥ इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभ, श्रीकण्ठमतप्रतिष्ठापनाचार्य,
चतुरधिकसहस्रप्रबन्धनिर्वाहक, श्रीमहाव्रतयाजि, श्रीमदप्पय्य-
दीक्षितसोदर्य श्रीमदाच्चान्दीक्षितपौत्रस्य श्रीनारायण
दीक्षितात्मजस्य कैयटव्याख्यानशिवतत्त्वरहस्याद्यनेक-
प्रबन्धनिर्मातुः श्रीनीलकण्ठदीक्षितस्य तृतीय-
नन्दनेन गीर्वाणेन्द्रदीक्षितेन विरचितः
शृङ्गारकोशो नाम भाणः
समाप्तः ॥

॥ श्रीकाशीविश्वनाथाय नमः ॥

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शृङ्गारकोशस्थश्लोकानां अकाराद्यनुक्रमणिका

	श्लो. सं.
अविकुचकलशं	72
अध्यास्य चक्र	15
अन्योन्यचञ्चु	63
अयं पुरस्ताडित	66
अस्तं न यावत्	76
अस्तं याति सरोजिनीं	74
अस्तमुपेयुषि	75
अस्त्यस्तोक	6
अक्षौ करे मे	45
आकारसम्पदि	24
आगुल्फायत	12
आमुच्य हारं	43
इन्दावभ्युदिते	78
इक्षुर्यस्य	2
उद्बुद्धमुग्ध	32
उद्यद्दिवाकर	14
उन्मृष्टकुङ्कुम	17
एते तमीरमण	20
एतौ धीरावपि	69
एषा रसज्ञा	8
एषा सव्येतर	47
कण्ठे कोकिल	41
करकलित	28
किमेषा सर्वस्वं	31
कुमारो बालो वा	36
कृत्वाञ्जलिं	68
कृत्वान्तर्हित	70
गाहन्ते श्रुतिसम्पुटीं	39
चन्द्रं पश्चिम	10
जये दृढालिङ्गन	44
तद्रूपकेण	5
तनीयस्यचैव	23
तन्वीं वीजयत	48
त्वमेव मे सुवदने	58
तिष्ठन्तः क्षणं	56
दृष्टिः पुरस्थमपि	27
नातिमात्रमरविन्द	51
निर्णिद्रतां कुमुद	77
निश्वसिति नाति	19
निसर्गकुटिला	59
पञ्चेषोरघुना	49
पद्य न नूतनोल्लेख	53
परस्परतुलां	65
पश्यैतानि च	11
पक्षौ वितत्य	62
बद्ध्वा बाहुताभ्यं	55
बाह्यं धनं	71
भानुः फालतलं	40
भूयानस्ति	35
भूयादस्खलित	80
मञ्जीरनादमधुरं	30
मन्दं मन्दमुदेति	50
मन्दाः केचन	3
मन्दं विधेहि	29
मध्येमनः	1
मय्यालिङ्गितुं	38
मुक्तश्शुक इति	34
मुग्धोऽसि मास्तु	46
मूर्तिमती रूपकला	79
यन्तारं सविधस्थं	37
यस्मिन्क्षोणिभुजां	7
यस्य प्राथमिकः	52
यावद्धानुरुपैति	18
रम्यैरपाङ्ग	21
राकासुधाकर	26
वाणीव प्रथित	25
व्यालोल	57
विकस्वरपिक	42
विधत्ते कौटिल्यं	22
शब्दान्कानपि	4
शृङ्गाग्रगाढ	64
सकृदुच्चरितं	33
सखि रसज्ञासि	54
सन्ध्याराग	13
सम्मर्दमत्र विनिवार	61
समुच्छ्रितजयध्वजो	67
स्वस्थानोच्च	16
सान्द्रैश्चान्द्रमसैः	9
सिन्दूरन्ति कुरङ्ग	73
सौधान्तस्स्थितिं	60

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

(SARASVATI MAHAL LIBRARY PRESS, THANJAVUR.)

T CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy